# आदर्श–प्रश्न–पत्रम्–2019–20

## कक्षा : दशमी

## संस्कृतम् (122)

## मॉडल पेपर–3

**समयः– होरात्रयम्** **सम्पूर्णांकाः–80**

**सामान्यनिर्देशाः–**

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 11 पृष्ठानि मुद्रितानि सन्ति।
2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति।
3. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमांकः अवश्यं लेखनीयः।
4. अस्य प्रश्नपत्रस्य पठनाय 15 निमेषाः निर्धारिताः सन्ति। अस्मिन् अवधौ केवलं प्रश्नपत्रं पठनीयम् उत्तरपुस्तिकायां च किमपि न लेखनीयम्।

**प्रश्नपत्रस्वरूपम्–**

**खण्ड : क : अपठित–अवबोधनम्** **10 अंकाः**

**खण्ड : ख : रचनात्मककार्यम्** **15 अंकाः**

**खण्ड : ग : अनुप्रयुक्तव्याकरणम्** **25 अंकाः**

**खण्ड : घ : पठित–अवबोधनम्** **30 अंकाः**

(i) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
(ii) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
(iii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
(iv) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
(v) प्रश्नानाम् निर्देशाः ध्यानेन अवश्यं पठनीयाः।

---

## खण्डः – क 10 अंकाः

## अपठित–अवबोधनम्

**1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत– 10**

गङ्गा भारतस्य सर्वासु नदीषु पवित्रतमा अस्ति। इयं हिमालयस्य गंगोत्री स्थानानात् निर्गच्छति। पर्वतस्य प्रान्तेभ्यः निःसृत्य गङ्गा हरिद्वार नामके स्थाने समतलं भूभागं स्पृशयति। हरिद्वार तीर्थे प्रतिवर्ष लक्षाणि जनाः आयान्ति। तत्र गङ्गायाः शीतलं, निर्मलं जलम् अस्ति। गङ्गायाः उत्पत्ति विषये इयं कथा प्रचलिता अस्ति। यत् पुरा भगीरथः नाम नृपः स्वपूर्वजानाम् उद्धाराय तपस्याम् अकरोत्। तपस्यायाः प्रभावेण गङ्गा स्वर्गात् भूतले अवतीर्णा जाता। अत एव इयं गङ्गा भागीरथी अपि कथ्यते, प्रारम्भे अस्यायः स्त्रोतः लघु भवति पश्चात् अनेके निर्झराः अस्याम् नद्याम् आमिलन्ति, यैः गङ्गायाः जलप्रवाहः तीव्रः भवति। गङ्गायाः तटे ऋषिकेशः, हरिद्वारम्, प्रयागः, वाराणसी च एतानि प्रधानानि तीर्थस्थानानि सन्ति। गङ्गाजलम् तु अमृतम् कथ्यते।

1. एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्) $1 \times 2 = 2$
   (i) नदीषु पवित्रतमा नदी का अस्ति?
   (ii) हरिद्वार तीर्थे प्रतिवर्ष कियन्तः जनाः आयान्ति?
   (iii) भगीरथः केषाम् उद्धाराय तपस्याम् अकरोत्?
2. पूर्णवाक्येन लिखत– (केवलं प्रश्नद्वयम्) $2 \times 2 = 4$
   (i) गङ्गा कुतः निर्गच्छति?
   (ii) गङ्गा स्वर्गात् भूतले कथम् अवतीर्णा जाता?
   (iii) 'वाराणसी' कस्याः तटे स्थिता अस्ति?
3. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत। 1
4. यथानिर्देशम् उत्तरत– (केवलं प्रश्नत्रयम्) $1 \times 3 = 3$
   (i) 'निर्मलं जलम्' अनयोः पदयोः विशेषणं किम्?
   (क) जलम्
   (ख) निर्मलम्
   (ग) अनयोः
   (ii) 'मन्दः' इति पदस्य विलोम पदं गद्यांशे किम् प्रयुक्तम्?
   (क) तीव्रः
   (ख) प्रान्तेभ्यः
   (ग) नृपः

(iii) 'सलिलम्' इत्यस्य पदस्य कः पर्यायः अत्र आगतः?
(क) शीतलम्
(ख) निर्मलम्
(ग) जलम्

(iv) 'अकरोत्' क्रियापदस्य कर्तृपदं किम्?
(क) गङ्गा
(ख) भगीरथः
(ग) स्त्रोतः

**उत्तरम् :**

1. (i) गंगा
(ii) लक्षाणि
(iii) स्वपूर्वजानाम्
2. (i) गङ्गा हिमालयस्य गंगोत्री स्थानात् निर्गच्छति।
(ii) गङ्गा स्वर्गात् भूतले भगीरथस्य स्वपूर्वजानाम् उद्धाराय तपस्यायाः प्रभावेण अवतीर्णा जाता।
(iii) 'वाराणसी' गङ्गायाः तटे स्थिता अस्ति।
3. **शीर्षक–** गङ्गायाः वर्णनम्, पवित्रा नदी।
4. (i) (ख) निर्मलम्
(ii) (क) तीव्रः
(iii) (ग) जलम्
(iv) (ख) भगीरथः

## खण्डः – ख 15 अंकाः

## रचनात्मककार्यम्

**2. भवान् अनुजः। स्वविद्यालयस्य वर्णनं कुर्वन् मित्रं प्रति लिखिते पत्रे रिक्तस्थानानि मञ्जूषायां प्रदत्त शब्दैः पूरयित्वा पत्रं पुनः लिखत–** $1/2 \times 10 = 5$

परीक्षाभवनम्
गाजियाबादतः
तिथिः.........
प्रिय (1) .......... विवेक,
(2) ..........
अत्र कुशलम् तत्रास्तु। अहम् अधुना निजविद्यालयस्य वर्णनं कर्तुम् (3) ..........। मम विद्यालयस्य भवनम् अतीव (4) .......... अतीव (5) .......... चास्ति। एषः विद्यालयः अति प्रसिद्धः अस्ति। (6) .......... परीक्षा परिणामः अत्युत्तमः भवति। सर्वे (7) .......... परिश्रमशीलाः सन्ति। (8) .......... अपि अत्र अनुशासनप्रियाः सन्ति। (9) .......... पुनः लेखिष्यामि।
भवतः (10) ..........
अनुजः

| मञ्जूषा |
|---|
| मित्रम्, सुन्दरम्, छात्राः, मित्रं, इच्छामि, अध्यापकाः, सप्रेम नमः, विशालम्, अस्य, विस्तरेण |

**उत्तरम् :**

परीक्षाभवनम्
गाजियाबादतः
तिथिः.........
प्रिय (1) **मित्रम्** विवेक,
(2) **सप्रेम नमः**
अत्र कुशलम् तत्रास्तु। अहम् अधुना निजविद्यालयस्य वर्णनं कर्तुम् (3) **इच्छामि**। मम विद्यालयस्य भवनम् अतीव (4) **विशालम्** अतीव (5) **सुन्दरम्** चास्ति। एषः विद्यालयः अति प्रसिद्ध अस्ति। (6) **अस्य** परीक्षा परिणामः अत्युत्तमः भवति। सर्वे (7) **छात्राः** परिश्रमशीलाः सन्ति। (8) **अध्यापकाः** अपि अत्र अनुशासनप्रियाः सन्ति। (9) **विस्तरेण** पुनः लेखिष्यामि।
भवतः (10) **मित्रं**
अनुजः

**3. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत–** $1 \times 5 = 5$



| |
|---|
| **मञ्जूषा–**नदी, वृक्षाः, रजकः, बालौ, क्षालयति, वस्त्राणि, तरतः, शुष्यन्ति, पर्वताः, खगाः, शिलापट्ट के। |

**उत्तरम् :**

1. अस्मिन् चित्रे पर्वताः वृक्षाः च शोभन्ते।
2. अत्र एका नदी वहति।
3. नद्याम् बालौ आनन्देन तरतः।
4. एकः रजकाः वस्त्राणि शिलापट्ट के क्षालयति।
5. एकत्रः वस्त्राणि शुष्यन्ति।

**अथवा**

**मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत–** $1 \times 5 = 5$

**"मम विद्यालयः"**

| |
|---|
| **मञ्जूषा–**तरणतालः, भवनम्, क्रीडाक्षेत्रम्, छात्राः, पुस्तकालयः, छात्रान्, अध्यापकाः, पुस्तकानि, पादकन्दुकेन, पाठयन्ति, वृक्षाः, क्रीडन्ति। |

**उत्तरम् :**

**मम विद्यालयः**

मम विद्यालयस्य भवनम् विशालं सुन्दरं च अस्ति। मम विद्यालये बहवः छात्राः पठन्ति। अध्यापकाः छात्रान् परिश्रमेण पाठयन्ति। मम विद्यालये पुस्तकालयः अस्ति, यत्र छात्राः पुस्तकानि पठन्ति। मम विद्यालये क्रीडाक्षेत्रम् अस्ति यत्र ते पादकन्दुकेन क्रीडन्ति। विद्यालये एकः तरणतालः अपि अस्ति।
विद्यालयं परितः वृक्षाः शोभन्ते।

**4. अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत- (केवलं वाक्यपञ्चकम्)** $1 \times 5 = 5$

1. आलस्य मनुष्य का सबसे बड़ा शत्रु है।
   Laziness is the greatest enemy of a man.
2. 5 सितंबर को शिक्षक दिवस मनाया जाता है।
   On 5th sep. teacher's day is celebrated.
3. तुम गाँव कब जाओगे?
   When will you go to a village?
4. पके आम का रंग पीला होता है।
   Riped mango is yellow.
5. अब रेलवे आरक्षण आसान हो गया है।
   Now railway reservation has become easy.
6. अपना मोबाइल नंबर बताओ।
   Tell your mobile no.
7. दिल्ली भारत की राजधानी है।
   Delhi is the capital of India.

**उत्तरम् :**

1. आलस्यं/अलसत्वं मानवस्य/मनुजस्य महारिपुः।
2. सप्टेम्बरमासस्य पञ्चमे दिनाङ्के शिक्षकदिनम् आचर्यते/शिक्षकदिनं सम्पद्यते।
3. त्वं ग्रामं कदा गमिष्यसि?
4. पक्वम् आम्रफलं पीतम्/पीतवर्णीयम्।
5. अधुना रेलयान-आरक्षणं/रेलयानारक्षणं सुकरं/सुलभं जातम्।
6. तव भ्रमणध्वनिक्रमाङ्कं कथय/निवेदय।
7. देहली भारतस्य राजधानी विद्यते।

**खण्डः ग 25 अंकाः**

## अनुप्रयुक्तव्याकरणम्

**5. अधोलिखितवाक्येषु रेखांकितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत- (केवलं प्रश्नचतुष्यम्)** $1 \times 4 = 4$

1. मम मित्रं शास्त्रेषु पारं + गतः।

   **उत्तरम् :** पारङ्गतः
2. विज्ञानस्य दुरुपयोगः विनाशाय भवति।

   **उत्तरम् :** दुः + उपयोगः
3. विद्यालयस्य वातावरणं स्वच्छं भवति।

   **उत्तरम् :** स्व + छं
4. मुनिः देवालये प्रातः + गच्छति।

   **उत्तरम् :** प्रातर्गच्छति
5. सः निर् + रसं फलं खादति।

   **उत्तरम् :** नीरसम्

**6. अधोलिखितवाक्येषु रेखांकितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत- (केवलं प्रश्नचतुष्यम्)** $1 \times 4 = 4$

1. व्यवहारेण दोषगुणाः भवन्ति।
   (क) च दोष गुणाः
   (ख) दोषः गुणः
   (ग) दोषाः च गुणाः च

   **उत्तरम् :** (ग) दोषाः च गुणाः च
2. वानराणां यूथस्यपतिः सर्वान् कपीन् अवदत्।
   (क) यूथपः
   (ख) यूथपतिः
   (ग) यूथस्यपति

   **उत्तरम् :** (ख) यूथपतिः
3. सः सदैव शक्तिम् अनतिक्रम्य कार्यं करोति।
   (क) यथाशक्तिं
   (ख) यथाशक्तिः
   (ग) यथाशक्तियः

   **उत्तरम् :** (क) यथाशक्तिं
4. मातापितरौ पूज्यनीयाः भवन्ति।
   (क) पिता माता
   (ख) माता च पिता च
   (ग) च माता पिता

   **उत्तरम् :** (ख) माता च पिता च
5. सा अनुरूपम् अस्ति।
   (क) रूपम् योग्यम्
   (ख) योग्यम् रूपम्
   (ग) रूपस्य योग्यम्

   **उत्तरम् :** (ग) रूपस्य योग्यम्

**7. अधोलिखितवाक्येषु रेखांकितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत- (केवलं प्रश्नचतुष्यम्)** $1 \times 4 = 4$

1. नर्तकी शोभनं नृत्यति
   (क) नृत्+अक्+ई
   (ख) नर्तक+ङीप्
   (ग) नर्तक+ईङ्

   **उत्तरम् :** (ख) नर्तक+ङीप्

2. प्राचीनतम् + टाप् बहि एषा गणना।
(क) प्राचीनतमा
(ख) प्राचीनतमः
(ग) प्राचीनतमाः

**उत्तरम् :** (क) प्राचीनतमा

3. रामः बुद्धिः + मतुप् बालः अस्ति।
(क) बुद्धिमन्तः
(ख) बुद्धिमान्
(ग) बुद्धिमत्

**उत्तरम् :** (ख) बुद्धिमान्

4. तव कृशता मां तुदति।
(क) कृश + तल्
(ख) कृश + त्व
(ग) कृश + ता

**उत्तरम् :** (क) कृश + तल्

5. पृथिव्याः गुरु + त्व सर्वे जानन्ति।
(क) गुरुत्वः
(ख) गुरुत्वं
(ग) गुरुता

**उत्तरम् :** (ख) गुरुत्वं

**8. मञ्जूषायां प्रदत्तैः पदैः वाच्यपरिवर्तनं कृत्वा अधोलिखितं संवादं पुनः लिखत–** $1 \times 3 = 3$

**रमेशः**– किं छात्राः प्रार्थनां कुर्वन्ति?
**महेशः**– आम्, छात्रैः (1). .......... क्रियते।
**रमेशः**– किं सर्वे प्रार्थनासभायाम् अनुशासने तिष्ठन्ति?
**महेशः**– आम् सर्वैः अनुशासने (2) ..........।
**रमेशः**– किं तत्र एका छात्रा गीतं गायति?
**महेशः**– आम्, तत्र एकया (3) .......... गीतं गीयते।

| मञ्जूषा |
|---|
| छात्रया, प्रार्थना, स्थीयते। |

**उत्तरम् :**
(1) प्रार्थना, (2) स्थीयते, (3) छात्रया।

**अथवा**

**अधोलिखितानां वाक्यानां वाच्यपरिवर्तनं कुरुत (केवलं त्रयाणाम्)–**

1. अहं श्लोकान् पठामि।
2. अहं पत्रं लिखामि।
3. अहं ग्रामं गच्छामि।
4. वयं पुस्तकं पठामः।
5. त्वं पत्रं लिखसि।

**उत्तरम् :**
1. मया श्लोकाः पठ्यन्ते।
2. मया पत्रं लिख्यते।
3. मया ग्रामः गम्यते।
4. अस्माभिः पुस्तकं पठ्यते।
5. त्वया पत्रं लिख्यते।

**9. कालबोधकशब्दैः अधोलिखित– दिनचर्यां वा पूरयत– (केवलं प्रश्नचतुष्टयम्)** $1 \times 4 = 4$

1. प्रातः 6:00 .......... वादने उत्तिष्ठति।
2. अपराह्णे 1:30 .......... वादने सः भोजनं करोति।
3. सायं 2:15 .......... वादने भ्रमणाय गच्छति।
4. अहं सायं 5:00 .......... वादने मित्रैः सह क्रीडामि।
5. रात्रौ 7:45 .......... वादने शयनं करोति।

**उत्तरम् :**
1. षड्
2. सार्द्धएक
3. सपाद–द्वि
4. पञ्च
5. पादोन–अष्ट

**10. मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत– (केवलं प्रश्नषटकम्)** $1/2 \times 6 = 3$

1. अहं पश्यामि यद् वृद्धाः तु ......... चलन्ति।
2. ये मेघाः .......... गर्जन्ति न ते वर्षन्ति।
3. दग्धाः अश्वाः .......... अधावन्।
4. महीपालः द्वितीयं नेत्रम् .......... तस्मै ददौ।
5. यदा वसन्तागमन् भवति .......... कोकिलः कूजति।
6. मूर्खाः जनाः संसारे ......... जल्पन्ति।
7. ........ गृहं गच्छावः श्वः पुनः आगमिष्यावः।
8. छात्राः ......... किं करिष्यन्ति?

| मञ्जूषा |
|---|
| तदा, शनैः, वृथा, इतस्ततः, उच्चैः, अधुना, इदानीम्, अपि |

**उत्तरम् :**
1. शनैः
2. उच्चैः
3. इतस्ततः
4. अपि
5. तदा
6. वृथा
7. अधुना
8. इदानीम्

**11. अधोलिखितवाक्येषु रेखांकितपदम् अशुद्धम् अस्ति। शुद्धं पदं विकल्पेभ्यः चित्वा लिखत– (केवलं प्रश्नत्रयम्)** $1 \times 3 = 3$

1. ताः पाठं पठसि। (पठतः/पठन्ति/पठथः)
2. आवाम् ह्यः एव मणिपुरतः आगमिष्यावः। (आगच्छाव/आगच्छतु/आगच्छेत्)

3. सः बालिका धावति। (बाला/बालिके/बालकः)
4. यूयं कुत्र उपविशसि? (उपविशथः/उपविशथ/उपविशामः)

**उत्तरम् :**

1. पठन्ति
2. आगच्छाव
3. बालकः
4. उपविशथ

## खण्डः – घ 30 अंकाः

## पठित–अवबोधनम्

**12. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत– 5**

(वनस्य दृश्यम् समीपे एवैका नदी अपि वहति।) एकःसिंहः सुखेन विश्राम्यते तदैव एकः वानरः आगत्य तस्य पुच्छं धुनोति। क्रद्धः सिंहः तं प्रहर्तुमिच्छति परं वानरस्तु कूर्दित्वा वृक्षमारूढः। तदैव अन्यस्मात् वृक्षात् अपरः वानरः सिंहस्य कर्णमाकृष्य पुनः वृक्षोपरि आरोहति एवमेव वानराः वारं वारं सिंहं तुदन्ति। क्रुद्धः सिंहः इतस्ततः धावति, गर्जति परं किमपि कर्तुमसमर्थः एव तिष्ठति। वानराः हसन्ति वृक्षोपरि च विविधाः पक्षिणः अपि सिंहस्य एतादृशीं दशां दृष्ट्वा हर्षमिश्रितं कलरवं कुर्वन्ति।

1. एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्) $1/2 \times 2 = 1$
   (i) कः सुखेन विश्राम्यते?
   (ii) कः सिंहस्य पुच्छं धुनोति?
   (iii) अपरः वानरः कस्य कर्णमाकृष्य वृक्षोपरि आरोहति?
2. पूर्णवाक्येन उत्तरत– (केवलं प्रश्नमेकम्) $1 \times 1 = 1$
   (i) क्रुद्धः सिंहः किं करोति?
   (ii) पक्षिणः किं दृष्ट्वा हर्षमिश्रितं कलरवं कुर्वन्ति?
3. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत– (केवलं प्रश्नत्रयम्) $1 \times 3 = 3$
   (i) 'क्रुधः सिंहः' इति अनयोः किं विशेषणम्?
      (क) क्रुधः
      (ख) सिंहः
      (ग) वानरः
   (ii) 'पक्षिणः' इत्यस्य क्रियापदं गद्यांशे किम्?
      (क) कुर्वन्ति
      (ख) हसन्ति
      (ग) तुदन्ति
   (iii) 'धुनोति इति क्रियायाः' कर्तृपदं किम्?
      (क) धावति
      (ख) नदी
      (ग) वानरः
   (iv) 'अवसादयन्ति' इत्यस्य पर्यायपदं गद्यांशात् चित्वा लिखत।
      (क) गर्जति
      (ख) तुदन्ति
      (ग) कुर्वन्ति

**उत्तरम् :**

1. (i) सिंहः।
   (ii) वानरः।
   (iii) सिंहस्य।
2. (i) क्रुद्धः सिंहः वानरं प्रहर्तुमिच्छति, इतस्ततः धावति, गर्जति परं किमपि कर्तुम् असमर्थः एव तिष्ठति।
   (ii) पक्षिणः सिंहस्य दशां दृष्ट्वा हर्षमिश्रितं कलरवं कुर्वन्ति।
3. (i) (क) क्रुधः।
   (ii) (क) कुर्वन्ति।
   (iii) (ग) वानरः।
   (iv) (ख) तुदन्ति।

**13. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत– 5**

कज्जलमलिनं धूमं मुञ्चति शतशकटीयानम्।
वाष्पयानमाला संधावति वितरन्ती ध्वानम्।।
यानानां पङ्क्तयो ह्यनन्ताः कठिनं संसरणम्। शुचि...।।

1. एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्) $1/2 \times 2 = 1$
   (i) केषाम् अनन्ताः पङ्क्तयः सन्ति?
   (ii) किं कठिनं जातम्?
   (iii) ध्वानं वितरन्ती का संधावति?
2. पूर्णवाक्येन उत्तरत– (केवलं प्रश्नमेकम्) $1 \times 1 = 1$
   (i) शतशकटीयानं कीदृशं धूमं मुञ्चति?
   (ii) किं वितरन्ती वाष्पयानमाला संधावति?
3. निर्देशानुसारम् उत्तरत– (केवलं प्रश्नत्रयम्) $1 \times 3 = 3$
   (i) 'कज्जलमलिनं धूमम्' अनयोः पदयोः किं विशेष्यपदम्?
      (क) घूमम्
      (ख) कज्जलम्
      (ग) मलिनम्
   (ii) 'वाष्पयानमाला' इति कर्तृपदस्य क्रियापदं किम्?
      (क) वितरन्ती
      (ख) संधावति
      (ग) ध्वानम्
   (iii) 'सरलम्' इत्यस्य पदस्य पद्यांशे किं विलोमपदं प्रयुक्तम्?
      (क) मुञ्चति
      (ख) संसरणम्
      (ग) कठिनम्
   (iv) 'ध्वनिम्' इत्यस्य पदस्य कः पर्यायः पद्यांशे प्रयुक्तम्?
      (क) ध्वानम्
      (ख) शकटीयानम्
      (ग) अनन्ताः

**उत्तरम् :**

1. (i) यानानाम्।
   (ii) संसरणम्।
   (iii) वाष्पयानमाला।
2. (i) शतशकटीयानं कज्जलमलिनं धूमं मुञ्चति।
   (ii) ध्वानं वितरन्ती वाष्पयानमाला संधावति।
3. (i) (क) धूमम्।
   (ii) (ख) संधावति।
   (iii) (ग) कठिनम्।
   (iv) (क) ध्वानम्।

**14. अधोलिखितं नाटयांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत–** 5

**चाणक्यः–** वत्स मणिकारश्रेष्ठिनं चन्दनदासमिदानीं द्रष्टमिच्छामि।

**शिष्यः–** तथेति (निष्क्रम्य चन्दनदासेन सह प्रविश्य) इतः इतः श्रेष्ठिन्। (उभौ परिक्रामतः)

**शिष्यः–** (उपसृत्य) उपाध्याय ! अयं श्रेष्ठी चन्दनदासः।

चन्दनदासः–जयत्वार्यः।

**चाणक्यः–** श्रेष्ठिन्! स्वागतं ते। अपि प्रचीयन्ते संव्यवहाराणां वृद्धिलाभा?

**चन्दनदासः–** (आत्मगतम्) अत्यादरः शंकनीयः।(प्रकाशम्) अथ किम्। आर्यस्य प्रसादेन अखण्डिता मे वणिज्या।

**चाणक्यः**–भो श्रेष्ठिन्! प्रीताभ्यः प्रकृतिभ्यः प्रतिप्रियमिच्छन्ति राजानः।

**चन्दनदासः–** आज्ञापयतु आर्यः किं कियत् च अस्मज्जनादिष्यते इति।

1. एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्) $1/2 \times 2 = 1$
   (i) कः चन्दनदासं द्रष्टुमिच्छति?
   (ii) अत्यादरः कीदृशः?
   (iii) प्रीताभ्यः प्रकृतिभ्यः राजानः किम् इच्छन्ति?
2. पूर्णवाक्येन उत्तरत– (केवलं प्रश्नमेकम्) $1 \times 1 = 1$
   (i) चाणक्यः कम् द्रष्टुमिच्छति ?
   (ii) केषां वृद्धिलाभाःप्रचीयन्ते ?
3. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत– (केवलं प्रश्नत्रयम्) $1 \times 3 = 3$
   (i) 'प्रीताभ्यः प्रकृतिभ्यः'– इत्यनयोः किं विशेष्य पदम्?
      (क) प्रीताभ्यः
      (ख) प्रकृतिभ्यः
      (ग) उभौ
   (ii) 'आगत्य' इत्यस्य किं विलोम पदं नाट्यांशे प्रयुक्तम्?
      (क) निष्क्रम्य
      (ख) श्रेष्ठी
      (ग) प्रचीयन्ते
   (iii) 'जयत्वार्यः'– अत्र क्रियापदं किम्?
      (क) जयतु
      (ख) आर्यः
      (ग) इच्छन्ति
   (iv) 'प्रकृतिभ्यः प्रतिप्रियमिच्छन्ति राजानः'–अत्र कर्तृपदं किम्?
      (क) प्रतिप्रियम्
      (ख) प्रकृतिभ्यः
      (ग) राजानः

**उत्तरम् :**

1. (i) चाणक्यः।
   (ii) शंकनीयः।
   (iii) प्रतिप्रियम्।
2. (i) चाणक्यः–मणिकारश्रेष्ठिनं चन्दनदासं द्रष्टुमिच्छति।
   (ii) संव्यवहाराणां वृद्धिलाभाः प्रचीयन्ते।
3. (i) (ख) प्रकृतिभ्यः।
   (ii) (क) निष्क्रम्य।
   (iii) (क) जयतु
   (iv) (ग) राजानः

**15. रेखांकित–पदानि आधृत्य प्रश्ननिर्माणं कुरुत– (केवलं प्रश्नचतुष्ट्यम्)** $1 \times 4 = 4$

1. कृषकः क्षेत्रकर्षणं करोति स्म।
2. बलीवर्दः जवेन गन्तुम् अशक्तः आसीत्।
3. कृषकः वृषभं तोदनेन नुद्यमानः अवर्तत।
4. वृषभः क्षेत्रे पपात।
5. सर्वधेनूनां माता सुरभिः आसीत्।

**उत्तरम् :**

1. कृषकः किं करोति स्म?
2. कः जवेन गन्तुम् अशक्तः आसीत्?
3. कृषकः वृषभं केन नुद्यमानः अवर्तत?
4. वृषभः कुत्र पपात?
5. सर्वधेनूनां माता का आसीत्?

**16. मञ्जूषातः समुचितपदानि चित्वा अधोलिखित–श्लोकयोः अन्वयं पूरयत–** $1/2 \times 4 = 2$

I. शरीरोपचयः कान्तिर्गात्राणां सुविभक्तता।
दीप्ताग्नित्वमनालस्यं स्थिरत्वं लाघवं मृजा।।

**अन्वयः–** (देहं मर्दनात् व्यायामेन) शरीरोपचयः, (1) .......... गात्राणां (2) .........., दीप्ताग्नित्वम्, (3) .........., स्थिरत्वम् , लाघवम् (4) .......... (च आयाति)।

II. भवति शिशुजनो वयोऽनुरोधाद्
गुणमहतामपि लालनीय एव। $1/2 \times 4 = 2$
व्रजति हिमकरोऽपि बालभावात्
पशुपति–मस्तक–केतकच्छदत्वम्।।

**अन्वयः–** गुणमहताम् अपि (1) .......... शिशुजनः (2) .......... एव भवति। (3) .......... हि हिमकरः अपि (4) .......... मस्तक–केतकच्छदत्वम् व्रजति।

| मञ्जूषा |
|---|
| सुविभक्तता, मृजा, अनालस्यम्, कान्तिः, बालभावात्, वयोऽनुरोधात्, पशुपतिः, लालनीयः। |

**उत्तरम् :**

I **अन्वयः** (1) कान्तिः, (2) सुविभक्तता, (3) अनालस्यम् (4) मृजा।

II **अन्वयः** (1) वयोऽनुरोधात्, (2) लालनीयः, (3) बालभावात्, (4) पशुपतिः।

**अथवा**

**मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत–** $1 \times 4 = 4$

निजबुद्ध्या विमुक्ता सा भयाद् व्याघ्रस्य भामिनी।
अन्योऽपि बुद्धिमाँल्लोके मुच्यते महतो भयात्।।

**भावार्थः–** यथा .......... नाम रूपवती स्त्री .......... बुद्धिकौशलेन वने व्याघ्रस्य .......... विमुक्ता जाता, तथैव संसारे अन्योऽपि प्रज्ञावान् जनः .......... भयात् विमुक्तः भवति।

| **मञ्जूषा–** भयाद्, स्वस्य, बुद्धिमती, महतः |
|---|

**उत्तरम् :**

**भावार्थः–** यथा **बुद्धिमती** नाम रूपवती स्त्री **स्वस्य** बुद्धिकौशलेन वने व्याघ्रस्य **भयाद्** विमुक्ता जाता, तथैव संसारे अन्योऽपि प्रज्ञावान् जनः **महतः** भयात् विमुक्तः भवति।

**17. अधोलिखित–कथांशं समुचित–क्रमेण लिखत–** $1/2 \times 8 = 4$

1. जम्बुककृतोत्साहः व्याघ्रः पुनः काननम् आगच्छत्।
2. व्याघ्रं दृष्ट्वा सा पुत्रौ ताडयन्ती उवाच–अधुना एकमेव व्याघ्रं विभज्य भुज्यत।
3. मार्गे सा एकं व्याघ्रं अपश्यत्।
4. प्रत्युत्पन्नमतिः सा श्रृगालं आक्षिपन्ती उवाच।
5. व्याघ्रः व्याघ्रमारी इयमिति मत्वा पलायितः।
6. 'त्वं व्याघ्रत्रयं आनयितुं' प्रतिज्ञाय एकमेव आनीतवान्।
7. गलबद्धश्रृगालकः व्याघ्रः पुनः पलायितः।
8. बुद्धिमती पुत्रद्वयेन उपेता पितुर्गृहं प्रति चलिता।

**उत्तरम् :**

1. बुद्धिमती पुत्रद्वयेन उपेता पितुर्गृहं प्रति चलिता।
2. मार्गे सा एकं व्याघ्रं अपश्यत्।
3. व्याघ्रं दृष्ट्वा सा पुत्रौ ताडयन्ती उवाच–अधुना एकमेव व्याघ्रं विभज्य भुज्यत।
4. व्याघ्रः व्याघ्रमारी इयमिति मत्वा पलायितः।
5. जम्बुककृतोत्साहः व्याघ्रः पुनः काननम् आगच्छत्।
6. प्रत्युत्पन्नमतिः सा श्रृगालं आक्षिपन्ती उवाच।
7. 'त्वं व्याघ्रत्रयं आनयितुं' प्रतिज्ञाय एकमेव आनीतवान्।
8. गलबद्धश्रृगालकः व्याघ्रः पुनः पलायितः।

**18. 'क' स्तम्भे लिखितानां पदानां पर्यायपदानि 'ख' स्तम्भे लिखितानि सन्ति। तानि यथासमक्षं लिखत–** $1 \times 3 = 3$ **(केवलं प्रश्नत्रयम्)**

| क | ख |
|---|---|
| सुविभक्तता | स्वच्छीकरणम् |
| मृजा | शैथिल्यम् |
| क्लमः | शारीरिकं सौष्ठवम् |
| उष्णः | तापः |

**उत्तरम् :**

| | | |
|---|---|---|
| सुविभक्तता | = | शारीरिकं सौष्ठवम् |
| मृजा | = | स्वच्छीकरणम् |
| क्लमः | = | शैथिल्यम् |
| उष्णः | = | तापः |

**अथवा**

**अधोलिखितवाक्येषु रेखांकितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत– (केवलं प्रश्नत्रयम्)** $1 \times 3 = 3$

1. संसारे जीवितं दुर्वहम् जातम्।
   (क) भृशम्
   (ख) भक्ष्यम्
   (ग) दुष्करम्
   **उत्तरम् :** (ग) दुष्करम्
2. संसारे विद्वांसः ज्ञानचक्षुभिः नेत्रवन्तः कथ्यन्ते।
   (क) आत्मनः
   (ख) चक्षुष्मन्तः
   (ग) बुद्धिमन्तः
   **उत्तरम् :** (ख) चक्षुष्मन्तः
3. जम्बुकः व्याघ्रस्य उपहासं करोति।
   (क) श्रृगालः
   (ख) गजः
   (ग) वानरः
   **उत्तरम् :** (क) श्रृगालः
4. चौरस्य पादध्वनिना अतिथिः प्रबुद्धः।
   (क) गतः
   (ख) जागृतः
   (ग) कृशकायः
   **उत्तरम् :** (ख) जागृतः

WWW.CBSE.ONLINE

Download unsolved version of this paper from www.cbse.online